# नैमित्तिकीनां काम्यानां च सामिधेनीनां विधान विवरणम्

DSV Jagannatha Sharma
Assistant Professor
Kalpa Department, S.V. Vedic University,Tirupati

**त्रीँस्तृचाननु ब्रूयाद्राजन्यस्य त्रयो वा अन्ये राजन्यात् पुरुषा ब्राह्मणो वैश्यः शूद्रस्ता-नेवास्मा अनुकान् करोति पञ्चदशानु ब्रूयाद्राजन्यस्य पञ्चदशो वै राजन्यः स्व एवैनँ स्तोमे प्रति ष्ठापयति त्रिष्टुभा परि दध्यादिन्द्रियं वै त्रिष्टुगिन्द्रियमाः खलु**

**पुनरपि सामिधेनीरेवाधिकृत्योच्यते** –

[1]"त्रींस्तृचानिति॥ नवेत्यवचनादावृत्तौ नवर्चः"। आद्यास्तिस्रः तिसृभिरुक्ता इत्येके।

त्रित्वान्वयात् ब्राह्मणादीन् [2]"अस्य अनुकान्" [3]कमितन् करोति। "अनुकाभिक°" (पा ५.२.७४) इति निपात्यते॥

पञ्चदशो वा इति। प्रजापतेरुरो बाहुप्रभवत्वाद्द्वयोः। पूर्वेण सहास्य विकल्पः॥

**व्याख्याता नवमे स्पष्टं प्रवरा [4]निविदादयः॥**

अथ दशमे नैमित्तिक्यः काम्याश्च सामिधेन्य उच्यन्ते॥

**त्रीनिति॥** तत्र राजन्यं निमित्तीकृत्य विधत्ते - 'त्रीँस्तृचाननु ब्रूयाद्राजन्यस्य त्रयो वा अन्ये राजन्यात् पुरुषा ब्राह्मणो वैश्यः शूद्रस्तानेवास्मा अनुकान् करोति' इति॥ "प्र वो वाजाः" (तैब्रा ३.५.२) [5]"इत्येषा त्रिरावृत्ता"। "त्वं वरुण अग्न आयाहि" (तैब्रा ३.५.२) [6]इत्येकस्तृचः। (तैब्रा ३.५.२) [7]इत्येका परिधानीया त्रिरावृत्ता।

**एवं त्रयस्तृचाः।** तेन तृचानां त्रित्वेन [8]राजन्यव्यति-रिक्तान् ब्राह्मणादींस्त्रीन् वर्णान् राजन्यस्यानुकूलान् करोति॥

**पञ्चदशेति॥** पक्षान्तरं विधत्ते-'पञ्चदशानु ब्रूयाद्राजन्यस्य पञ्चदशो वै राजन्यः स्व एवैन स्तोमे प्रतिष्ठापयति' इति॥ प्रजापतेरुरसो बाहुभ्यां च [9]"पञ्चदशस्तोमस्य राजन्यस्य च" उत्पन्नत्वादसौ स्तोमो राजन्यस्य स्वकीयः। यद्यपि [10]"पञ्चदश सामिधेनीरन्वाह" (तैसं २.५.८) इति वर्णत्रयसाधारण-वचनेनैवायं पक्षः प्राप्तस्तथापि 'त्रीँस्तृचान्' इत्यनेन विशेषवचनेन [11]नित्यबाधप्राप्तौ विकल्पार्थं पञ्चदश' इति प्रतिप्रसवो [12]विधीयते॥

**वै राजन्यो यजते त्रिष्टुभैवास्मा इन्द्रियं परि गृह्णाति यदि कामयेत (१) ब्रह्मवर्च-समस्त्विति गायत्रिया परि दध्याद्ब्रह्मवर्चसं वै गायत्री ब्रह्मवर्चसमेव भवति सप्तदशानु ब्रूयाद्वैश्यस्य सप्तदशो वै वैश्यः स्व एवैनँ स्तोमे प्रति ष्ठापयति जगत्या परि दध्याज्जागता वै पशवः**

**त्रिष्टुमेति॥** "त्वं वरुण उत" (तैब्रा ३.५.२) इति॥ इन्द्रियं वा इति। तद्धेतुत्वात्ताच्छब्ध्यम्॥

**गायत्रियेति॥** "आजुहोत" (तैब्रा ३.५.२) [13]इत्येतया। [14]"*पृथुपाजा: तँ सबाधः (तैब्रा ३.६.१) इत्येते घाय्यास्थाने निधेये ||

**सप्तदशेति॥** द्वयोरपि मध्यदेशप्रभवत्वात् प्रजापतेः।

**त्रिष्टुभेति॥** 'त्वं वरुण' इत्येतां परिधानीयां विधत्ते-'त्रिष्टुभा परि दध्यादिन्द्रियं वै त्रिष्टुगिन्द्रियकामः खलु वै राजन्यो यजते त्रिष्टुभैवास्मा इन्द्रियं परि गृह्णाति' इति। त्रिष्टुभ इन्द्रेण सहोत्पन्नत्वात् तत्संबन्धीन्द्रियरूपत्वम्। राजन्यः च युयुत्सुत्वादिन्द्रियसामर्थ्य कामः॥

**यदीति॥** राजन्यस्य नित्यां परिधानीयां विधाय "काम्यां विधत्ते -[15]'यदि कामयेत ब्रह्मवर्चसम-स्त्विति गायत्रिया परि दध्यात् ब्रह्मवर्चसं वै गायत्री ब्रह्मवर्चसमेव भवति' इति॥ "आजुहोत दुवस्यत (तैब्रा ३·५·२) इत्येषा गायत्री। "तत् सवितुः" (तैसं १.५.६) इत्यस्या गायत्र्या उपदेशेन ब्रह्म-वर्चसनिष्पत्तेः तस्य गायत्रीरूपत्वम्॥

**सप्तदशेति॥** वैश्यं निमित्तीकृत्य विधत्ते-'सप्तदशानु ब्रूयाद्वैश्यस्य सप्तदशो वै वैश्यः स्व एवैनट् स्तोमे प्रति ष्ठापयति' इति॥ "समिध्यमानो अध्वरे", "समिद्धो अग्न आहुत" (तैब्रा ३.५.२) "इत्यनयोर्मध्ये" पृथुपाजा अमर्त्यः " तँ सबाधो यतस्रुचः" (तैब्रा ३.६.१, ऋसं ३.२७.५-६) इत्येतयोर्धाय्ययोः प्रक्षेपेण सप्तदशसंख्यानिष्पत्तिः। प्रजापतेर्मध्यदेशात् [16]वैश्यसप्तदशस्तोमयोः उत्पन्न- त्वात् [17]सप्तदशस्तोमस्तदीयः॥

[1] तं३ - लं. हो १ - त्रींस्तृचानि न (ने) वत्येकवचनादावृत्तौ एवं नवत्यर्चः।
[2] लं. हो- अस्य; तं३ - यस्यानुकान्।
[3] तं३ - 'कमितृन् ' नास्ति।
[4] आ - निगदादयः।
[5] आ.क- इत्येका त्रिरावृत्तत्वात्।
[6] ड.शृं- इत्यादिक एक।
[7] ड - इत्येषा।
[8] शृं हो १ - क्षयियव्यति।
[9] ड- राजन्यपञ्चदशस्तोमयोः।
[10] अ.जो. ना. पाहा - रणबलात्तेनैवायं।
[11] नित्यवद्बाधप्राप्तौ; अ. इ. उ. जो. ना. पा. हा - नित्यवद्बाधकप्राप्तौ।
[12] शृं- अभिधीयते।
[13] लं. हो - इत्येकया; तं३ - इत्येके।
[14] *-* लं- 'पृथुपाजा... इत्येतया ' इत्ययं भागः नास्ति।
[15] ड. . हो १ - काम्यां परिधानीयां।
[16] आ. क - सप्तदशस्तोमवैश्ययोः।
[17] शृं- असौ स्तोम।

**पशुकामः खलु वै वैश्यो यजते जगत्यैवास्मै पशून् परि गृह्णात्येकं विंशतिमनु ब्रूयात् प्रतिष्ठाकामस्यैक विंशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्यै (२) चतुं विंशतिमनु**

**जगत्येति।** "जनस्य गोपाः" (तैसं ४.४.४) इत्येतया *। "जगतीशब्द उत्सादिः (पा ४.१.८६)।।
**एकविंशतिमिति॥** पञ्चदशत्वान्वयात् प्रथमोत्तमावृत्तिवत् एतासामेवावृत्त्या एकविंशत्याद्य-भिमतसंख्यापूरणमिति केचित्। "युवा हि" (तैसं २.६.११) [1]"इत्यादि नव सामिधेनीति केचित्"। स्तोमानां प्रतिष्ठेति। त्रिवृत्पञ्चदशसप्तदशानां प्रधानस्तोमानां, तत्र अनुगतत्वात्॥
**चतुर्विंशतिमित्यादि॥** गतम्॥
**जगत्येति॥** वैश्यस्य "समिध्यमानो अमृतस्य राजसि" (ऋ ५.२८.२) इत्येतां परि-धानीयां विधत्ते-'जगत्या परि दध्यात् जागता वै पशवः पशुकामः खलु वै वैश्यो यजते जगत्यैवास्मै पशून् परि गृह्णाति' इति ॥ जगत्यनुष्ठानलब्धत्वात् पशूनां जागतत्वम्। वैश्यस्य क्षीरदध्यादिविक्रयाय पशुकामत्वं प्रसिद्धम्॥
**एकविंशतिमिति॥** [2]नैमित्तिकीः विधाय [3]काम्याः विधत्ते - "एक विशतिमनु ब्रूयात् प्रतिष्ठाकामस्यैकविंशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्यै' इति॥ अत्र संख्यापूरणं संप्रदायविद्भिरेवमुक्तम्- एकविंशत्यादिषु प्रथमाया उत्तरे द्वे ईडे अग्निमित्यादिके। अथान आयाहीत्यादि। अथ त्वामग्ने पुष्करादधीति त्रयस्तृचाः। अग्निमग्निमित्येकादश। पृथुपाजा इत्यष्टौ। [4]अष्टाचत्वारिंशत्पक्षस्य दाशतय्यास्तिस्र आगम- यितव्याः | एकविंशत्यादिषु कार्येषु एतासां [5]यथार्थमागमः' इति। अस्यायमर्थः - यदा सामिधेनीवृद्धिरपेक्षिता [6]तदानीम् आम्नातायाः " प्र वो वाजाः " (तैब्रा ३.५.२) इत्यस्या उपरि " ईडे अग्निम् " (तैब्रा २.४.२) इत्यादिकं द्वयं प्रक्षेपणीयम्। तत् ऊर्ध्वम्' अग्न आ याहि' इत्यादिकं यथाम्नातं पठितम्। तत्र [7]समिध्यमान-समिद्धवत्योः* मध्ये "त्वामग्ने " (ऋ ६.१६.१३) इत्यादिना[8] उदाहृताः प्रक्षेपणीयाः। यावतीनां प्रक्षेपेण

**ब्रूयाद्ब्रह्मवर्चसकामस्य चतुर्विंशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रयैवास्मै ब्रह्मवर्चसमवं रुन्द्धे त्रिंशतमनु व्यादन्नकामस्य त्रिंशयक्षरा विराडन्नं विराड्-विराजैवास्मा अन्नाद्यमवं रुन्द्धे द्वात्रिंशतमनु ब्रूयात् प्रतिष्ठाकामस्य द्वात्रिंशदक्षरानुष्टुमनुष्टुप् छन्दसा प्रतिष्ठा प्रतिष्ठित्यै**

त्रिंशदक्षरा विराडिति || त्रिभिः दशकैः विराडिति॥
छन्दसां प्रतिष्ठेति॥ " वाग्वा अनुष्टुप् " (तैसं ५.१.३) इति तस्याः सर्ववाङ्मयत्वात्॥

[9]अभीष्टसंख्या पूर्यते [10]"तत्र तावतीनां" [11]प्रक्षेप इति। मीमांसकास्तु (मीसू ५.३.४-६) [12]श्राय्यासंज्ञ- कानामेव " [13]समिध्यमानसमिद्धवत्योर्मध्ये प्रक्षेपः, इतरासां त्वन्ते [14]"प्रक्षेप इत्याहुः"। तत्रापि परिधानीयाया [15]उत्तमायाः प्रागेवेत्ययं विशेषो द्रष्टव्यः। त्रिवृत्पञ्चदशसप्तदशानां संख्या चतुर्थ एकविंशस्तोमेन्तर्भूते ति स स्तोम इतरेषां स्तोमानां प्रतिष्ठा॥

**चतुर्विंशतिमिति॥** फलान्तराय विधत्ते - 'चतुर्विंशतिमनु ब्रूयाद्ब्रह्मवर्चसकामस्य चतुर्विंशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैवास्मै ब्रह्मवर्चसमव रुन्द्धे ' इति॥
**त्रिंशतमिति॥** पुनरपि फलान्तराय विधत्ते - 'त्रिंशतमनु ब्रूयादन्नकामस्य त्रिंशदक्षरा विराडन्नं विराड्विराजैवास्मा अन्नाद्यमव रुन्द्धे' इति॥ दशाक्षरैस्त्रिभिः पादैर्विराजस्त्रिशदक्षरत्वम्। तच्छन्दोनुष्ठानेनान्नस्य [16]लभ्यमानत्वात् तस्य छन्दसोन्नत्वम्॥
**द्वात्रिंशतमिति॥** पुनः फलान्तराय विधत्ते - "द्वात्रिंशतमनु ब्रूयात् प्रतिष्ठाकामस्य द्वात्रिंशदक्षरानुष्टुगनुष्टुप् छन्दसां प्रतिष्ठा प्रतिष्ठित्यै इति॥ अन्यत्र वाग्वा अनुष्टुक् (तैसं ५.१.३) इति [17]श्रवणाद्वाग्रूपत्वमनुष्टुभः। वाचि सर्वेषां छन्दसामन्तर्भावादनुष्टुमितरच्छन्दसां प्रतिडा ||

**षट्त्रिंशतमनु ब्रूयात् पशुकामस्य षट्त्रिंशदक्षरा बृहती बार्हिताः पशवो बृहत्यै-वास्मै पशून (३) वं रुन्द्धे चतुंश्चत्वारिंशशतमनु ब्रूयादिन्द्रियमस्य चतु श्चत्वारिंशदक्षरा त्रिष्टुमिन्द्रियं त्रिष्टुप् त्रिष्टुभैवास्म इन्द्रियमवं रुन्द्धेष्टाचत्वारिं-शतमनु ब्रूयात् पशुकामस्याष्टाचत्वारिंशदक्षरा जगती जगताः पशवो जगत्यैवास्मै पशूनवं रुन्द्धे**

**बृहतीशब्दोप्युत्सादिः** (पा ४.१.८६)। बृहत्याः पशव्यत्वात् बार्हतत्वं पशूनाम्॥
**इन्द्रियं त्रिष्टुबिति॥** इन्द्रियत्रिष्टुभोः समानप्रभवत्वात्॥
**जगत्या इति॥** जगत्याः पशव्यत्वात्॥

---

[1] मै४ - ° धेनी केचिदित्यन्ये; त३. लं. हो - ' धेनी केचिदन्ये।
[2] आ.क- नैमित्तिकीं।
[3] आ. क - काम्यां।
[4] अ. आ - °रिंशत्यक्षरस्य।। आ.क-।।
[5] अ. इ. उ. जो. ना. पा. हा - यथार्थमागमयितव्याः।
[6] आ. क- तदा।
[7] अ. इ. उ. जो. पा. शृं. हा - सामिध्य- मानेद्धवत्योः। * [ 'समिध्यमानो अध्वरे' (तैब्रा ३०५०२) इत्येषा समिध्यमानवती, ' समिद्धो अन आहुत' (तैब्रा ३.५०२) इत्येषा च समिद्धवती द्रष्टव्या। ]।
[8] आ. क. ड - इत्यादिकाः।
[9] आ. क- संख्या।
[10] आ. क - तत्प्रमाणवतीनां; ड. हो १ तत्प्रभवन्तीनाम्।
[11] ड- प्रक्षेपण।
[12] कं. ड - याज्यासं।
[13] अ. इ. उ. जो. पा. शृं. हा - समिध्यमाद्धवत्योर्मध्ये 1
[14] आ. क - प्रक्षेपमाहुः।
[15] ड. हो १ - ' उत्तमायाः ' नास्ति।
[16] आ. क - लभ्यत्वात् ; हा -- लक्ष्यत्वात्।
[17] ड. शृं- अनुष्टुभो वाग्रूपत्वश्रयणात्।

**षट्त्रिंशतमिति।** पुनः [1]फलान्तराय विधत्ते - 'षट्त्रिंशतमनु ब्रूयात् पशुकामस्य षट्त्रिश्शदक्षरा बृहती बार्हताः पशवो बृहत्यैवास्मै पशूनव रुन्द्धे' इति। पशूनां बृहतीछन्दसोनुष्ठानेन लभ्यत्वात् बार्हतत्वम्॥

**चतुश्चत्वारिँशतमिति॥** फलान्तराय विधत्ते - 'चतुश्चत्वारिँश्शतमनु ब्रूयादिन्द्रियकामस्य चतुश्चत्वारिँशदक्षरा त्रिष्टुमिन्द्रियं त्रिष्टुप् त्रिष्टुभैवास्मा इन्द्रियमव रुन्द्धे' इति॥

**अष्टाचत्वारिँशतमिति।** पुनः फलान्तराय विधत्ते - 'अष्टाचत्वारिँशतमनु ब्रूयात् पशु- कामस्याष्टाचत्वारिँशदक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनव रुन्द्धे' इति॥

**सर्वा॑णि॒ छन्द्राँ॑स्यनुं ब्रूयाद्बहुया॒जिन॒ः सर्वा॑णि॒ वा ए॒तस्य॒ छन्द्राँ॑स्यवं॑रुद्धानि॒ यो**
**बं॑हुया॒ज्यपं॑रिमित॒मनुं ब्रूया॒दपं॑रिमित॒स्यावं॑रुद्ध्यै।। (१०)।।**
[ का॒मयें॑त प्रति॑ष्ठित्यै प॒शून्स॒प्तच॑वारिँ॑शच्च। ]

**बहुयाजिन इति॥** सोमयाजी बहुयाजी, तस्य सर्वाणि गायत्र्यादीनि जगत्यन्तानि छन्दांसि अवरुद्धानि।

**अपरिमितमिति॥** नवाद्यष्टाचत्वारिंशदन्तोक्तसंख्या परिच्छेदरहितम् अपरिच्छिन्नस्य इति द्वितीये पञ्चमे दशमोनुवाकः॥

**सर्वाणीति॥** सोमयाजिनं [2]निमित्तीकृत्य विधत्ते-'सर्वाणि छन्द्राँस्यनु ब्रूयाद्बहुयाजिनः सर्वाणि वा एतस्य छन्द्राँस्यवरुद्धानि यो बहुयाजी' इति॥ [3]बहुभिर्दक्षणीयादिभिरिष्टिभिरग्नीषोमीयादि-पशुभिरैन्द्रवायवादिग्रहैश्च यजत इति बहुयाजी। एतस्य बहुयाजिनः सवनत्रये [4]गायत्री त्रिष्टुब्जगतीरूपाणि [5]सर्वाणि 'छन्द्राँसि' अवरुद्धानि भवन्ति। तस्मात् सोमयाजी यदा दर्शपूर्णमासावनुतिष्ठति तदा तस्य त्रीणि छन्दांस्यनुब्रूयात्। "समिध्यमानः प्रथमो नुं धर्मः" (तैब्रा १.२.१) इत्येषा त्रिष्टुप्। "त्वामग्ने प्र दिव आहुतं घृतेन" (तैब्रा १.२.१) इत्येषा जगती। एतदुभयं समिद्धवत्याः पूर्वं पठनीयम्॥

**अपरिमितमिति॥** [6]तस्य सोमयाजिनः "त्रींस्तृचान्" (तैसं २.५.१०) इत्यनुवाके 'अष्टाचत्वारिँशतमनुब्रूयात्' इत्यन्ते यः संख्याविशेषः तत्र स्वेच्छैव नियामिका, न तु वाचनिको नियमोस्तीत्येतद्विधत्ते – 'अपरिमितमनु ब्रूयादपरिमितस्यावरुद्ध्यै' इति। 'अपरिमितस्य"अधिकस्य फलस्येत्यर्थः॥

**अत्र मीमांसा॥ तृतीयाध्यायस्य षष्ठपादे चिन्तितम्-**

"सामिधेनीः सप्तदश प्रकृतौ विकृतावुत।
पूर्ववत् प्रकृतौ पाञ्चदश्येनैतत् [7]विकल्पते॥
विकृतौ साप्तदश्यं स्यात् प्रकृतौ प्रक्रियाबलात्।
पाञ्चदश्यावरुद्धत्वादाकाङ्क्षाया निवृत्तितः"॥(जैन्या ३०६·३-४)॥

**अनारभ्य श्रूयते–** "सप्तदश सामिधेनीरनु ब्रूयात्" (द्र.तैसं२.५.१०; ६.३.७) इति। "प्र वो वाजा अभिद्यवः" (तैब्रा ३.५.२) इत्याद्याः अग्निसमिन्धनार्था ऋचः सामिधेन्यः। तासां साप्तदश्यं पूर्वन्यायेन प्रकृतिगतम् | यदि प्रकृतौ "पञ्चदश सामिधेनीरन्वाह "(तैसं २.५.८) इति विधिः स्यात् तर्हि[8] [9]पाञ्चदश्यसाप्तदश्ये [10]विकल्पेयाताम् इति प्राप्ते ब्रूमः-विकृतावेव साप्तदश्यं निविशते। प्रकृतौ पाञ्चदश्ये-नावरुद्धानां सामिधेनीनां संख्याकाङ्क्षाया अभावात्। न च [11]पाञ्चदश्यसाप्तदश्ययोः समानबलत्वादव- रोधाभाव इति शङ्कनीयम्। पाञ्चदश्ये प्रकरणानुग्रहस्याधिकत्वात्। तस्मात् [12]मित्रविन्दाध्वरकल्पादिविकृतौ [13]साप्तदश्यमवतिष्ठते। न चात्र पूर्वन्यायोस्ति। सासदश्यस्य चोदकप्राप्त्यभावेन पुनर्विधानदोषाभावात्॥

**तत्रैवान्यच्चिन्तितम् —**

"साप्तदश्यं तु वैश्यस्य विकृतौ प्रकृतावुत।
पूर्ववच्चेन्न संकोचान्नित्ये नैमित्तिकोक्तितः॥
गोदोहनेन प्रणयेत् [14]कामीत्येतदुदाहरत्।
भाष्यकारस्तदप्यस्तु न्यायस्यात्र समत्वतः"॥ (जैन्या ३.६•५-६)॥

"सप्तदशानु ब्रूयाद्वैश्यस्य" (तैसं २.५.१०) इति विहितं [15]वैश्यनिमित्तकं साप्तदश्यं पूर्वन्यायेन विकृतिगामीति चेत्। मैवम्। नैमित्तिकेनानेन – [16]"वचनेन प्रकृतिगतस्य नित्यस्य पाञ्चदश्यस्य वैश्यव्यति-रिक्तविषयतया" संकोचनीयत्वात्। नित्यं सामान्यरूपतया सावकाशत्वेन च दुर्बलं, नैमित्तिकं तु विशेष- रूपत्वनिरवकाशत्वाभ्यां प्रबलम्। तस्मात् वैश्यनिमित्तकं साप्तदश्यं प्रकृतावविष्ठते। अत्र भाष्यकारो - न्यदुदाजहार " चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्य " (द्र. आपश्री १.१६.२) इति। तत्र प्रकृतेश्चमसेनाचरुद्धत्वाद्गोदोहनं विकृताविति पूर्वः पक्षः। कामनानिमित्तकेन गोदोहनेन नित्यस्य चमसस्य निष्कामविषयतया संकोचनीयत्वात् प्रकृतावेव गोदोहनमिति [17]सिद्धान्तः॥

**दशमाध्यायस्याष्टमपादे चिन्तितम्-**

---

1 क - फलान्तरं।
2 आ.हा - अधिकृत्य।
3 अ. उ. जो. ना. पा- दिभिरैन्द्रवायवादिग्रहैश्च; इ- दीक्षणीया- दिभिरैन्द्रवायवादिग्रहैश्च।
4 आ. क- गायत्र्युष्णिगनुष्टुब्जगती।
5 हा - 'सर्वाणि ' नास्ति।
6 ड- तस्यास्य।
7 क. श्रृं - विकल्प्यते।
8 अ. इ. उ. जो. ना. पा. हा - ' तर्हि ' नास्ति।
9 आ-पाञ्चदश्यं साप्तदश्यं च।
10 क.ड. श्रृं - विकल्प्येयाताम्।
11 क. ड. श्रृं. हो १ - दश्यवाक्ययोः।
12 अ. इ. उ. जो. ना. पा. हा - अध्वर।
13 ड - सप्तदश्यमेव तिष्ठते।
14 श्रृं - हरन्।
15 आ. क- निमित्तं।
16 ड - प्रकृतिगतस्य पाञ्चदशस्य वैश्यस्य वा अतिरिक्तविषयतया; अ. इ. उ. जो. ना. पा- 'दश्यस्य वैश्यव्यतिरिक्ततया।
17 ड - राद्धान्तः।

"सामिधेनीसाप्तदश्यं वैमृधादावपूर्वगीः।
संहतिर्वोपकारस्य क्लृप्त्याद्योस्त्वाज्यभागवत्॥
सामिधेन्यश्वोदकाप्ताः साप्तदश्यं तु वैमृधे।
पुनर्वाक्येन संहार्यमनारभ्योक्तिचोदितम्"॥ (जैन्या १०.८.१७-१८)॥

**अनारभ्य किंचिदाम्नायते-**"सप्तदश सामिधेनीरनु ब्रूयात्" (तैसं २.५.१०; ३.६.७) इति। तथा वैमृधेध्वरकल्पायां पशौ [1]चातुर्मास्येषु मित्र विन्दायामाग्रयणेष्ट्यादौ च पुनः [2]साप्तदश्यं विहितम्। यद्यप्यनारभ्याभीतानां प्रकृतिगामित्वं न्याय्यं तथापि [3]श्रुतेन पाञ्चदश्येनावरुद्धत्वाद्विकृतिष्वेतन्निविशते। तथा सति वैमृधादिविकृतिष्वनारभ्यवादप्राप्ताः सप्तदश सामिधेन्यः प्राकरणिकेन विधिना पुनर्विधीयमाना गृहमे भीयाज्यभागवत् क्लृप्तोपकारकत्वेनेतिकर्तव्यताकाङ्क्षा पूरयन्त्यश्वोदकं लोपयन्त्यो वैमृधादेरपूर्वकर्मतां गमयन्ति। साप्तदश्यं त्वनारभ्यवादप्राप्तमनूद्यत इति प्राप्ते ब्रूमः-वैमृधादिषु सामिधेन्य आज्यभागवन्न

विधीयन्ते, किं तु चोदकप्राप्तास्ता अनूद्य साप्तदश्यं विधीयते। [4]तत्र साप्तदश्यं वैमृधादिप्रकरणे बाम्नातैः विधिभिः कासुचिदेव विकृतिषु प्राप्तम्, अनारभ्यवादेन [5]तु सर्वासु विकृतिषु। तन्नानारभ्यवादो विलम्बते। प्रथमं विधेयस्य साप्तदश्यस्य सामिधेनीसंबन्धमवबोध्य तत्संबन्धान्यथानुपपत्त्या [6]क्रतुप्रवेशं परिकल्प्य प्रकृतौ [7]पञ्चदश्यपराहतत्वेन विकृतिषु सर्वासु [8]निवेशः क्रियत इति विलम्बः। प्राकरणिकैः विधिभिः सामिधेनीसंबन्ध एव बोधनीयः। क्रतौ तद्विशेषे च [9]प्रवेशो न [10]कल्पनीयः।[11]प्रत्यक्षप्रकरणपाठेनैव तत्सिद्धेः। तत्र साप्तदश्यस्य [12]वैमृधादिविकृतिविशेषसंबन्धे सहसा प्रतिपन्ने सति [13]"तद्विरोधात् सर्वविकृति-संबन्धो" न कल्पयितुं शक्यः। अनारभ्यवादस्तु वैमृधादिषु प्राप्तस्य नित्यानुवादोस्तु। यद्वा- प्रकरण- विभिर्वैमृधादिषु साप्तदश्यस्य प्रापकः। अनारभ्यवादस्तु चोदकप्राप्तस्य पाञ्चदश्यस्य बाधकः। सर्वथापि चतुर्धा करणवदुपसंहारो न त्वाज्यभागवदपूर्वं कर्म॥

**तत्रैव पञ्चमपादे चिन्तितम् -**

"सामिधेनीविवृद्धौ किमागमोभ्यस्यतामुत।
आगमः पूर्ववन्नैवमभ्यासप्रकृतित्वतः॥
तत्राप्याद्यन्तयोर्यावत् [14]पूर्त्यभ्यासो यथोक्ति वा।
[15]अभ्यस्यागमतः पूर्तिः पूरणार्थत्वतोग्रिमः॥
त्रित्वं न पूरणायोक्तमन्यथाप्यत्र पूरणात्।
चिवक्षितमबाधित्वा भवेत् पूरणमागमात् "॥ (जैन्या १०.५,.१०-१२)॥

दर्शपूर्णमासयोः पञ्चदश सामिधेनीविधाय काम्या तद्वृद्धिर्विधीयते "एकविशतिमनु ब्रूयात् प्रतिष्ठाकामस्य"(तैसं २.५.१०) इत्यादिना। यथा बहिष्पवमाने ऋगागमस्तथा [16]अत्रापीति प्राप्ते ब्रूमः। एकादशभिः पठिताभिः [17]ऋग्भिः [18]पञ्चदशसंख्याया अपूर्तीवृगन्तरागमनेन तत्पूरणं [19]"न कृतं" किं तु तत्पूरणायाभ्यासो विहितः "त्रिः प्रथमामन्वाह त्रिरुत्तमाम्" (तैसं २.५.७) इति। अतः काम्यानामप्यभ्यासेन पूरणं युक्तम्। अभ्यासपक्षेपि यावत्कृत्वोभ्यासे सत्येकविंशतिसंख्या पूर्यते तावत्कृत्वः प्रथमोत्तमे अभ्यसनीये। कुतः ? विहितस्य त्रिरभ्यासस्य पूरणार्थत्वदर्शनात्। मैवम्। न हि त्रित्वं पूरणार्थं त्रिहितम्। प्रथमाया द्विरभ्यासेनोत्तमायाश्चतुरभ्यासेनापि[20] [21]पञ्चदश संख्यायाः पूरणात्। अतो विवक्षितं त्रित्वम्। तथा सति [22]तदबाधाय [23]प्रथमोत्तमे [24]त्रिरेवाभ्यस्य षण्णामृचामागमेनैकविंशतिसंख्या पूरणीया॥

**इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय तैत्तिरीय संहिताभाष्ये क्रतुसंबन्धं। द्वितीयकाण्डे पञ्चमप्रपाठके दशमोनुवाकः॥**

---

[1] आ. क- ' चातुर्मास्येषु ' नास्ति।
[2] अ. इ. उ. जो. ना. पा. हा - ' साप्तदश्यं ' नास्ति।
[3] अ.इ. उ. जो. पा. हा - 'श्रुतेन' नास्ति।
[4] ड- अत्र।
[5] अ. इ. उ. जो. ना. पा. हा - 'तु' नास्ति।
[6] ड - क्रमप्रवेशं; हा- क्रतुसंबनधं।
[7] अ. इ. उ.पा. हा - पञ्चदश्यं परा।
[8] आ.हा - प्रवेशः।
[9] हा - ' प्रवेशः ' नास्ति।
[10] आ. क. ड - बोधनीयः।।
[11] आ.हा - प्रकरणेनैव।
[12] अ. इ. उ.जो. पा. हा- 'विकृतिसंबन्धे।
[13] आ.क.ड- तद्विरोधी विकृति।
[14] ड. हो १ - पूर्वाभ्यासो; शृं-पूर्त्याभ्यासो।
[15] अ. इ. उ. जो. पा. हा - अन्यस्यागमतः।
[16] हा - ' अत्र ' नास्ति।
[17] आ. क- 'ऋग्भिः नास्ति।
[18] ड - ° संख्या।
[19] ड - विकृतम् ; शृं- न विकृतम्।
[20] आ- 'अपि ' नास्ति।
[21] आ. क - संख्या |
[22] अ. इ. उ. जो. पा. हा - तदभ्यासाय; शृं तदवधाय (?);
[23] ड- सप्रथमोत्तमे।
[24] आ. क- त्रिरभ्यस्य।